# B.K. BIRLA CENTRE FOR EDUCATION

SARALA BIRLA GROUP OF SCHOOLS
A CBSE DAY-CUM-BOYS' RESIDENTIAL SCHOOL

## TERM-1 EXAMINATION (2026-27)

### SANSKRIT (119) SET – 2

| | |
|---|---|
| Class :VIII | Duration: 3 Hrs |
| Date :11.09.2026 | Max. Marks: 80 |
| Admission No.: | Roll No.: |

---

सामान्यनिर्देशाः

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 09 पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 16 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति ।
4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

---

प्रश्नपत्रस्वरूपम् -

| | |
|---|---|
| 'क' भागः अपठितावबोधनम् | 10 अङ्काः |
| 'ख' भागः : रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' भागः : अनुप्रयुक्तव्याकरणम् | 24 अङ्काः |
| 'घ' भागः : पठितावबोधनम् | 31 अङ्काः |

---

खण्ड 'क' भागः

अपठितावबोधनम् 10 अङ्काः

प्रश्न 01 गद्यांशं ध्यानेन पठित्वा प्रश्नान् उत्तरत –

(गद्यांश को ध्यान से पढ़कर प्रश्नों के उत्तर दीजिए।)

(Read the paragraph carefully and answer the questions.)

एकस्मिन् ग्रामे एकः वृद्धः कृषकः वसति स्म। तस्य द्वौ पुत्रौ आस्ताम्। तौ सर्वदा परस्परं कलहं कुर्वन्तौ आस्ताम्। एकदा पिता तौ आहूय काष्ठानां एकं गुच्छं दत्तवान्। सः उक्तवान्—"एतत् भञ्जयताम्।" तौ बहु प्रयत्नं कृतवन्तौ, किन्तु न भञ्जयितुं शक्तवन्तौ। ततः पिता पृथक् काष्ठानि सरलतया भञ्जयितुं शक्यन्ते इति दर्शयितुं पिता काष्ठानि पृथक् कृतवान्। तदा तौ सरलतया तानि अभञ्जयताम्। पिता अवदत्—"यदि यूयं मिलित्वा भविष्यथः तर्हि कश्चित् भवद्भ्यां हानिं कर्तुं न शक्नोति।" एवं पिता पुत्राभ्यां एकतायाः महत्त्वं शिक्षितवान्।

प्रश्नाः-

(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) (1X2=2)

(i) वृद्धः कः आसीत्?

(ii) कति पुत्रौ आस्ताम्?

(iii) पिता किं दत्तवान्?

(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) (2X2=4)

(i) पुत्रौ सर्वदा किं कुर्वन्तौ आस्ताम्?

(ii) पिता किमर्थं काष्ठानि पृथक् कृतवान्?

(iii) पिता पुत्राभ्यां किं शिक्षितवान्?

(स) भाषिककार्यम्। (केवलं प्रश्नत्रयम्) (1X3=3)

(i) "दत्तवान्" इति क्रियापदस्य कर्ता कः?

(क) पुत्रौ (ख) पिता

(ग) कृषकः (घ) ग्रामः

(ii) "मिलित्वा" इति पदस्य विलोमपदं किम्?

(क) पृथक् (ख) सर्वदा

(ग) एकदा (घ) तदा

(iii) "द्वौ" इति पदं कस्य विशेषणम्?

(क) ग्रामे (ख) पुत्रौ

(ग) वृद्धः (घ) कृषकः

(द) अस्य गद्यांशस्य उचितं शीर्षकं लिखत। (1X1=1)

## खण्ड ख

## रचनात्मक कार्यं (15 अंकात्मक:)

प्रश्न 02 मञ्जूषायाः समुचितानि पदानि चित्वा पत्रं पूरयित्वा उत्तर पुस्तिकयां पुनः लिखत - (½X10 =5)

निम्नलिखित पत्र को मंजूषा से उचित शब्द को चुनकर पूर्ण कीजिए और अपनी उत्तरपुस्तिका में पुनः लिखें

Complete the following letter by choosing the appropriate word from the box and rewrite it in your answer book.

(i) -------------

जयपुरम्

दिनाङ्कः ________

पूजनीय (ii) _________

सादरं (iii) _________।

अत्र सर्वे कुशलिनः (iv) _________। अद्य मम अर्धवार्षिकपरीक्षायाः (v) _________ प्राप्तः। अस्यां परीक्षायाम् अहं (vi) _________ स्थानं प्राप्तवान्। विद्यालये मह्यं (vii) _________ दत्त्वा सम्मानः कृतः। अहं अवकाशे (viii) _________ आगमिष्यामि। मातुः चरणयोः प्रणामः, भगिन्यै च स्नेहः।

भवतः प्रियः पुत्रः

(ix) _________

(x) _________

मञ्जूषा

परिणामः, रोहितः, छात्रावासः, अभिनन्दनपत्रम्, तत्रास्तु, मातुलश्री, द्वितीयम्, गृहम्, प्रणामः, नमः,

प्रश्न 03 ' वृक्षारोपणम् ' इति विषयमधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन एकं अनुच्छेदं लिखत- 1X5=5

'वृक्षारोपण' विषय पर मंजूषा में दिए गए शब्दों की सहायता से संस्कृत में एक अनुच्छेद लिखें:

Write a paragraph in Sanskrit on the topic 'vruksharopan' using the words given in the box:


| मञ्जूषा | वाक्यानि |
|---|---|
| वृक्षारोपणम्, पर्यावरणस्य, संरक्षणम्, प्राणवायुः, फलानि, छायाम्, वर्षाम्, आवश्यकाः, सर्वे, रोपयामः | 1. -------------------------------------- \|<br>2. -------------------------------------- \|<br>3. -------------------------------------- \|<br>4. -------------------------------------- \|<br>5. -------------------------------------- \| |

अथवा

पञ्चसंस्कृतवाक्येषु मञ्जूषापदसहायतया अधः दत्तं चित्रवर्णनं कुरुत।

(पाँच संस्कृत वाक्यों में मञ्जूषा के शब्दों की सहायता से नीचे दिए चित्र का वर्णन कीजिए।

Describe the following picture in five Sanskrit sentences with the help of words given in the box.)

|  | मञ्जूषा<br>एतत् चित्रम्, उद्यानम्, बालकाः, कन्दुकेन क्रीडन्ति, वृक्षाः, पुष्पाणि, हरितम्, प्रसन्नाः, स्वच्छम्, वातावरणम्<br><br>1. -------------------------------------- \|<br>2. -------------------------------------- \|<br>3. -------------------------------------- \|<br>4. -------------------------------------- \|<br>5. -------------------------------------- \| |
|---|---|

प्रश्न 04 अध: एका कथा लिखिता अस्ति। तस्यां कानिचित् पदानि रिक्तानि सन्ति। मञ्जूषायां दत्तानि पदानि सहायतायै तानि पूरयित्वा कथां पुनः उत्तरपुस्तिकायां लिखत। ½X10 =5

(नीचे एक कहानी दी गई है। उसमें कुछ पद रिक्त हैं। मञ्जूषा के पदों की सहायता से उन्हें पूर्ण करके कहानी को पुनः उत्तर-पुस्तिका में लिखिए।

An inspiring memory is given below. Some blanks are there. Complete those blanks and re-write the memory in answer sheet. Words are given in the box for help.)

एकदा एकः (1) _________ वनमार्गे गच्छति स्म। मार्गे सः एकं (2) _________ अपश्यत्। तस्य पादे (3) _________ आसीत्। सः सावधानीपूर्वकं तत् कंटकम् (4) _________। सिंहः प्रसन्नः अभवत्। सिंहः तं मूषकं मित्रं मत्वा (5) _________ अकरोत्। किञ्चित्कालानन्तरं शिकारी सिंहं (6) _________ गृहीतवान्। मूषकः आगत्य जालं (7) ____________। सिंहः मुक्तः अभवत्। उभौ (8) _________ अभवताम्। अतः वयं सर्वेषु (9) _________ दयां कुर्मः। दया महानतमः (10) _________ अस्ति।

मञ्जूषा

जाले, अच्छिनत्, मित्रौ, प्राणिषु, गुणः मूषकः, सिंहम्, कण्टकः, निष्काशयत्, मुक्तं,

अथवा

निम्नलिखितम् संवादं मञ्जूषाप्रदत्तपङ्क्तिसहायतया पूरयित्वा पुनः लिखत।
(निम्नलिखित संवाद को मञ्जूषा में दिए गए पंक्तियों की सहायता से पूरा करके पुनः लिखिए।
Complete the following dialogue with the help of sentences given in the box and re-write the same.)

राहुलः – भो मित्र! कुत्र गच्छसि?
मोहनः – (1) ______________________
राहुलः – किमर्थं पुस्तकालयं गच्छसि?
मोहनः – (2) ______________________
राहुलः – किं पुस्तकानि गृहं नेतुं शक्नोमि ?
मोहनः – (3) ______________________
राहुलः – पुस्तकालयः कदा उद्घाटितः भवति?
मोहनः – (4) ______________________
राहुलः – उत्तमम्। अहम् अपि त्वया सह आगमिष्यामि।
मोहनः – (5) ______________________

| मञ्जूषा |
|---|
| • अहं पुस्तकालयं गच्छामि। |
| • परीक्षायै पुस्तकानि ग्रहीतुं गच्छामि। |
| • आम्, सप्ताहपर्यन्तं नेतुं शक्नोति। |
| • प्रातः अष्टवादने उद्घाटितः भवति। |
| • आगच्छ मित्र! उभौ मिलित्वा अध्ययनं कुर्वः। |

## खण्ड ग

### अनुप्रयुक्त व्याकरणम् (24 अंकात्मक:)

प्रश्न 05 मञ्जूषायां प्रदत्तैः अव्ययैः सहायतया वाक्यानां रिक्तस्थानानि पूरयत – 1X5=5
मञ्जूषा में दिए गए अव्ययों की सहायता से वाक्यों के रिक्त स्थानों की पूर्ति कीजिए।
Fill in the blanks with the help of indeclinable given in the box.)

(अधुना, कदा, शनैः-शनैः, सर्वदा, यदा)

(1) _________ छात्राः परिश्रमं कुर्वन्ति, तदा सफलतां लभन्ते।
(2) मम भ्राता _________ पुस्तकं पठति।
(3) त्वं विद्यालयं _________ गच्छसि ?
(4) कच्छपः _________ चलति।
(5) _________ अहं देवं स्मरामि।

प्रश्न 06 स्थूलपदानाम् 'प्रकृतिप्रत्ययः' पृथक् संयोगाय शुद्धं उत्तरं चित्त्वा लिखत - 1X5=5
(स्थूल पदों के प्रकृति-प्रत्यय अलग व संयुक्त करके विकल्पों से शुद्ध उत्तर को चुनकर उत्तर-पुस्तिका में लिखिए।)
(Separate or join suffixes in the bold words and write answer appropriate from the options given below in the answer sheet.)

(1) बालकः जलं (पा + क्त्वा) ________ विद्यालयं गच्छति।
(क) पीत्वा (ख) पीतः
(ग) पातुम् (घ) पिबति

(2) छात्रः पुस्तकं (पठितुम्) ________ इच्छति।
(क) पठ् + तुमुन् (ख) पठ् + क्त
(ग) पठ् + ल्यप् (घ) पठ् + क्तवतु

(3) देवांशः विद्यालयं (गत्वा) = ________ + ________ अध्ययनं करोति ।
(क) गम् + क्त्वा (ख) गम् + तुमुन्
(ग) गम् + ल्यप् (घ) गम् + क्त

(4) लता कार्यं (कृ + क्तवतु) ________।

(क) कृतवान् (ख) कृतवती

(ग) अकरोत् (घ) करिष्यति

(5) बालकः विद्यालयं (गम् + क्त) ________।

(क) गतः (ख) गच्छति

(ग) अगच्छत् (घ) गन्तुम्

प्रश्न 07 शब्दरूपान् आधृत्य निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – (प्रश्नचतुष्टयम्) 1X4=4

शब्दरूप के आधार पर निर्देश के अनुसार उचित उत्तर चुनकर लिखिए (चार प्रश्न)

Choose the appropriate answer and write as per the instructions

(1) रामः ________ फलं ददाति। *(बालक – चतुर्थी, एकवचनम्)*

(क) बालकः (ख) बालकम्

(ग) बालकाय (घ) बालकेन

(2) ________ विद्यालयं गच्छामि। *(अस्मद् – प्रथमा, एकवचनम्)*

(क) मम (ख) अहम्

(ग) माम् (घ) मया

(3) ________ पुष्पाणि सुन्दराणि सन्ति। *(लता – षष्ठी, एकवचनम्)*

(क) लतायाः (ख) लताम्

(ग) लतया (घ) लतायै

(4) शिक्षकः ________ उपदिशति। *(छात्र – सप्तमी, बहुवचनम्)*

(क) छात्रेषु (ख) छात्रान्

(ग) छात्रैः (घ) छात्रेभ्यः

(5) ________ क्रीडन्ति। *(बालिका – प्रथमा, बहुवचनम्)*

(क) बालिका (ख) बालिकाम्

(ग) बालिकाः (घ) बालिकाभिः

प्रश्न 08 धातुरूपानुसारं विकल्पेभ्यःउत्तरं चित्वा उत्तरपुस्तिकयां लिखत – (प्रश्नचतुष्टयम्) 1X4=4

विकल्पों में से धातु रूप के अनुसार उत्तर चुनकर रिक्तस्थान भरें और उत्तर पुस्तिका में लिखें –

Fill in the blanks by choosing the answer according to the metal form from the options and rewrite in the answer sheet -

(1) मम गृहं पुणे नगरे -------- (अस् लट्)।

(क) अस्ति (ख) भवित

(ग) अस्मि (घ) असि

(2) त्वं सर्वदा संस्कृतं एव --------- (पठ् लट्)।

(क) पठति (ख) पठतः

(ग) पठथ (घ) पठसि

(3) बालकः निबंधं एव --------- (लिख् लोट्) ।

(क) लिखतु (ख) लिखेत्

(ग) लिखति (घ) लेखिष्यति

(4) भगिनी प्रातः भोजनं ------- (पच् लृट्)।

(क) पचसि (ख) पचति

(ग) पचिष्यतः (घ) पचिष्यति

(5) सिंहः जलाशये जलम् ------ (पा लङ्)।

(क) अपिबन् (ख) पिबन्तु

(ग) पिबेयु: (घ) पिबन्ति

प्रश्न 09 निम्नलिखितानां वाक्यानाम् अनुवादं हिन्दीभाषया संस्कृतभाषया च कुरुत - 1X6=6

निम्नलिखित वाक्यों का हिन्दी तथा संस्कृत भाषा में अनुवाद कीजिए।

Translate the following sentences into Hindi and Sanskrit.

(1) भारतस्य राष्ट्रफलं आम्रः अस्ति।

(2) छात्राः सम्यक् अध्ययनं कुर्वन्तु।

(3) अनुशासनं जीवने अनिवार्यम् अस्ति।

(4) चिरायु अधिक चलचित्र देखता है ।

(5) प्रातः योगाभ्यास करना चाहिए।

(6) संतोष के सामान सुख नहीं है।

## खण्ड घ

## पठितावाबोधनम् (31 अंकात्मक:)

प्रश्न 10 अधोलिखितं गद्यांश पठित्वा निर्देशानुसार प्रश्नान् उत्तरत-

नीचे दिए गए गद्यांश को पढ़ें और निर्देशानुसार प्रश्नों के उत्तर दें

Read the passage below and answer the questions as directed

'विश्ववन्धुत्वभावनया' युक्ता संसारस्य समस्त संस्कृतिषु भारतीया-संस्कृतिः मूर्धन्यास्ति। शिक्षायां ज्ञानविज्ञाने च भारतं सर्वदा अग्रसरं विद्यते। प्राचीनकाले नालन्दा, तक्षशिला इत्यादयः विश्वविद्यालयाः सम्पूर्णविश्वे अतीव प्रसिद्धाः आसन्। आधुनिकवैज्ञानिकयुगेऽपि चिकित्साशास्त्रे, सङ्गणकविद्यायाम्, अन्येषु च वैज्ञानिकेषु क्षेत्रेषु भारतीयाः समग्रविश्वे प्रमुखाः सन्ति। जनाः स्वहितं त्यक्त्वा देशस्य हिताय चिन्तयन्तु। स्वच्छतायाः ध्यानं कुर्वन्तु। छात्राः अपि नियमान् पालयन्तु सम्यक् अध्ययनं च कुर्वन्तु। एवं भवन्तः भारतस्य प्रगत्यां सहायकाः भविष्यन्ति। मूल्यः—वयं जागरित्वा राष्ट्रस्य प्रगत्यां सहायकाः स्याम।

(1) एकपदेन उत्तरत- (एक शब्द में उत्तर दीजिए। (केवलं प्रश्नद्वयम्) ½X2=1

(i) भारतं कस्मिन् सर्वदा अग्रसरं विद्यते?

(ii) भारतीयाः समग्रविश्वे के सन्ति?

(iii) जनाः कस्य हिताय चिन्तयन्तु?

(2) पूर्णवाक्येन उत्तरत-(पूर्णवाक्य में उत्तर दीजिए। (प्रश्नद्वयम्) 1X2=2

(i) भारतीया-संस्कृतिः कीदृशी अस्ति?

(ii) छात्राः किं कुर्वन्तु?

(iii) भवन्तः कथं भारतस्य प्रगत्यां सहायकाः भविष्यन्ति?

(3) निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1X2=2

(i) 'जनाः स्वहितं त्यक्त्वा देशस्य हिताय चिन्तयन्तु।' इति वाक्ये क्रियापदं किम्?

(क) जनाः (ख) स्वहितम्

(ग) त्यक्त्वा (घ) चिन्तयन्तु

(ii) 'भारतीया-संस्कृतिः मूर्धन्यास्ति।' इति वाक्ये क्रियापदं किम्?

(क) भारतीया (ख) संस्कृतिः

(ग) मूर्धन्या (घ) अस्ति

(iii) 'प्रमुखाः' इति पदस्य समानार्थकपदं गद्यांशे किम्?

(क) मूर्धन्याः (ख) अग्रसरम्

(ग) प्रसिद्धाः (घ) समग्र

प्रश्न 11 अधोलिखितं पद्यांश पठित्वा निर्देशानुसार प्रश्नान् उत्तरत-

नीचे दिए गए पद्यांश को पढ़ें और निर्देशानुसार प्रश्नों के उत्तर दें

Read the Phrases below and answer the questions as directed

शान्तितुल्यं तपो नास्ति, न संतोषात् परम सुखम् ।
न तृष्णायाः परो व्याधिः, न च धर्मो दयापरः ।।1।।
न कश्चित् कस्यचिन्मित्रम्, न कश्चित् कस्यचिद् रिपु: ।
व्यवहारेण जायन्ते, मित्राणि रिपवस्तथा ।।2।।

(1) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½X2=1

(i) कः दयापरः?

(ii) कः परः व्याधिः?

(iii) रिपवः केन जायन्ते?

(2) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1X2=2

(i) शान्तेः तुल्यं किं नास्ति?

(ii) कः धर्मः श्रेष्ठः उच्यते?

(iii) मित्राणि कथं जायन्ते?

(3) निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1X2=2

(i) 'न तृष्णायाः परो व्याधिः।' इति वाक्ये अव्ययपदं किम्?

(क) न (ख) तृष्णायाः

(ग) व्याधिः (घ) परः

(ii) 'शान्तितुल्यं तपो नास्ति।' इति वाक्ये क्रियापदं किम्?

(क) शान्तितुल्यम् (ख) तपः

(ग) नास्ति (घ) परम्

(iii) 'दु:खम्' इति पदस्य विलोमपदं पद्यांशे किम्?

(क) सुखम् (ख) धर्मः

(ग) मित्रम् (घ) तपः

प्रश्न 12 अधोलिखितं नाट्यांश पठित्वा निर्देशानुसार प्रश्नान् उत्तरत-

नीचे दिए गए गद्यांश को पढ़ें और निर्देशानुसार प्रश्नों के उत्तर दें

Read the Drama below and answer the questions as directed

शिक्षकः - (छात्रान् प्रति) भवन्तः जानन्ति किम् ? अस्वस्थाः केन कारणेन भवन्ति?

गीता - महोदय ! वयं दिनचर्यायाः सम्यक् पालनं न कुर्मः। एतेन कारणेन अस्वस्थाः भवामः।

शिक्षकः - शोभनम्। अद्य अहं' दिनचर्या' इति विषये किञ्चित् वक्तुम् इच्छामि। यूयं ध्यानेन श्रृणुयात।
प्रातः उत्थाय ईश्वरं स्मृत्वा मातरं पितरं च नमेत्। तत्पश्चात् उद्यानं गत्वा भ्रमणं योगाभ्यासं चाचरेत्।
ततः गृहमागत्य स्नानं कृत्वा प्रातराशं दुग्धं च स्वीकृत्य विद्यालयं गच्छेत्।

चिरायुः - मह्यं दुग्धं न रोचते महोदय। मध्यं प्रातराशे 'बर्गर चाऊमीन मोमो पिज्जा शीतपेय-ब्रेड' इत्यादीनि रोचन्ते।

शिक्षकः - ईदृशं भोजनं स्वास्थ्याय हानिकारकं भवति। सदैव स्वास्थ्य वर्धकानि खाद्यानि एव खादेयुः। ततः मध्याहने गृहम् आगत्य गृहे पक्वं शुद्धभोजनं गृहीत्वा विश्रामं कुर्युः।
लता - ततः ?
शिक्षकः - सायंकाले क्रीडित्वा गृहमागत्य गृहकार्य स्वाध्यायं च कुर्युः।
पवनः - महोदय। जीवने अनुशासनस्य किं महत्त्वम्?
शिक्षकः - अनुशासनं जीवने अनिवार्यम् अस्ति। अनुशासनबद्धम् जीवनं सर्वत्र प्रशंसनीयं भवति। नियमान् कदापि मा भिन्देयुः।

(1) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½X2=1
(i) प्रातः उत्थाय कं स्मरेत्?
(ii) चिरायुषे किं रोचते?
(iii) सायंकाले छात्राः किं कुर्युः?

(2) एकवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 1X2=2
(i) शिक्षकः प्रातराशे किं स्वीकर्तुम् उपदिशति?
(ii) शिक्षकः मध्याह्ने किं कर्तुम् उपदिशति?
(iii) अनुशासनबद्धं जीवनं कीदृशं भवति?

(3) निर्देशानुसारम् उत्तरत (केवलं प्रश्नद्वयम्) 1X2=2
(i) 'प्रातः उत्थाय ईश्वरं स्मृत्वा।' इति वाक्ये अव्ययपदं किम्?
(क) प्रातः (ख) ईश्वरम्
(ग) स्मृत्वा (घ) उत्थाय
(ii) 'अनुशासनं जीवने अनिवार्यम् अस्ति।' इति वाक्ये विशेषणपदं किम्?
(क) अनुशासनम् (ख) जीवने
(ग) अनिवार्यम् (घ) अस्ति
(iii) 'स्वास्थ्यवर्धकानि' इति पदस्य विलोमपदं संवादे किम् प्रयुक्तम्?
(क) हानिकारकम् (ख) अनुशासनम्
(ग) शुद्धभोजनम् (घ) दुग्धम्

प्रश्न 13 अधोलिखित वाक्येषु रेखांकित पदम् आधृत्य प्रश्ननिर्माणं कुरुत – 1X5=5
नीचे दिए गए वाक्यों में रेखांकित पद के आधार पर प्रश्न निर्माण कीजिए
Construct a question based on the underlined term in the sentences below
(1) यः विश्वे ज्ञानस्य प्रकाशं निरन्तर प्रसारयति तत् भारतम् अस्ति।
(2) स्नानं कृत्वा प्रातराशं दुग्धं च स्वीकृत्य विद्यालयं गच्छेत्।
(3) लघुपरिवारः एवआदर्शपरिवारः अस्ति ?।
(4) किन्तु मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।
(5) ह्यः अहं ज्वरेण पीड़ितः आसम्।

प्रश्न 14 अधोलिखितश्लोकांशान् यथायोग्यं मेलयत – 1X4=4
नीचे दिए गए श्लोकों का उचित मिलान कीजिए (Match the verses given below appropriately)

| क | ख |
|---|---|
| मूढैः पाषाण खण्डेषु | मित्राणि रिपवस्तथा |
| शोको नाशयते धैर्यं | रत्नसंज्ञा विधीयते |
| व्यवहारेण जायन्ते | जलमन्नं सुभाषितम् |
| पृथिव्यां त्रीणि रत्नानि | शोको नाशयते श्रुतम् |

प्रश्न 15 मंजूषातः समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत - ½X4=2

मंजूषा से उचित शब्द चुनकर निम्नलिखित श्लोक के अन्वय को भरकर पुनः लिखें

Choose the appropriate word from the box and fill in the context of the following verse and rewrite it.

शान्तितुल्यं तपो नास्ति, न संतोषात् परं सुखम्।
न तृष्णायाः परो व्याधिः, न च धर्मो दयापरः॥

अन्वयः- (1) __________ तुल्यं तपः नास्ति। सन्तोषात् परं (2) __________ नास्ति।
तृष्णायाः परः (3) __________ नास्ति। दयापरः(4) __________ नास्ति।

मञ्जूषा

धर्मः, शान्ति, व्याधिः, सुखम्

अथवा

सम्पत्तौ च विपत्तौ च महतामेकरूपता।
उदये सविता रक्तः रक्तश्चास्तं गते यथा ॥

अन्वयः - सम्पत्तौ विपत्तौ च (1) __________ एकरूपता भवति। सविता (2) __________ रक्तः भवति।
अस्तं गते अपि (3) __________ रक्तः भवति। एषः(4) __________ स्वभावः अस्ति।

मञ्जूषा

महताम्, उदये, सविता, समानः

प्रश्न 16 अधोलिखितकथां मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयित्वा पुनः लिखत- ½X10=5

मञ्जूषा में दिए गए शब्दों से रिक्त स्थान भरकर नीचे दी गई कहानी को पुनः लिखिए -

Rewrite the story below by filling in the blanks with the words given in the box:

एकस्मिन् ग्रामे जगत्पालो नाम एकः सज्जनो वसति। तस्य पत्नी कला अस्ति। तौ दम्पती सुखेन निवसतः। तयोः द्वे सन्तती स्तः, एकः तनयः एका च तनया। तनयस्य नाम विवेकः, तनयायाश्च नाम प्रतिभा अस्ति। विवेकः सप्तमकक्षायां पठति, प्रतिभा च तृतीयकक्षायाम्।

जगत्पालः एकः उद्योगी (1) -------- कृषकः अस्ति। सः (2) -------- कृषिकर्मणि संलग्नः स्वकर्तव्यं पालयति। सः परिश्रमं कृत्वा स्वक्षेत्रे पर्याप्तम् अन्नम्, शाकं, (3) -------- च उत्पादयति। तस्य गृहे एका (4) -------- धेनुः वर्तते। सा बहु दुग्धं ददाति।

विवेकः प्रतिभा च स्वास्थ्यपुष्टिभोजनं कुरुतः। तौ शाकं फलं चाधिक्येन खादतः। तौ विद्यालयं प्रति गच्छतः। विद्यालयतः (5) -------- स्वगृहकार्यं कुरुतः। तत्पश्चात् सायं स्वमित्रैः सह क्रीडतः।

(6) -------- एका स्वस्था आदर्शभूता च गृहिणी अस्ति। सा सदा स्वकार्याणि सम्पादयति, पत्युः सन्तानयोः स्वास्थ्यविषये स्वस्था (7) ------- च वर्तते। पतिः जगत्पालोऽपि (8) ------ कलां बहु मन्यते। अनेन प्रकारेण परस्परं स्नेह-सौहार्द-बद्धः अयं (9) -------- एकः आदर्शपरिवारः अस्ति। लघुपरिवारः एकः(10) -------- परिवारः ।

मंजूषा

सावधाना, सुखी, लघुपरिवारः, कला, आगत्य, श्वेतवर्णा, फलं, सर्वदा, कुशलश्च, स्वपत्नी,

========================= इत्यलम् =========================